कन्तुः, पुं, ("कंशंभ्यां बभयुस्तितुतयसः इति तुः"। ५।२।१३८। कम्+तुः। कामयते इति कमु कान्तौ। कमिदृशीत्यादिना कुप्रत्यये तुकि सिद्धत्वात्। "कमिमनिजनिगाभायाहिभ्यश्च"। उणां १।७३।) कामदेवः। इति त्रिकाण्डशेषः॥ हृदयम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (चित्तम्। इति उज्ज्वलदत्तः। कं सुखं अस्यास्तीति व्युत्पत्त्या सुखी जनः॥)

कन्था, स्त्री, (कम्+बाहुलकात् थन्+टाप्।) स्यूतकर्पटः। इति स्त्रीलिङ्गसंग्रहे अमरः॥ काँथा इति भाषा। (यथा, यतिपञ्चके २। "कन्थामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः"॥) मृण्मयभित्तिः। इति मेदिनी॥ काँथ् इति भाषा॥ उशीनराख्यजनपदप्रसिद्धग्रामाणां नामसु विषयभूतेषु षष्ठ्यन्तात् परा कन्था क्लीवे स्यात्। यथा सौशमीनां कन्था सौशमिकन्थम्। आह्वरीनां कन्था आह्वरिकन्थम्। इत्यमरटीकायां भरतः॥

कन्थारी, स्त्री, (कम्+थारन्। पृषोदरादित्वात् थुक्। गौरादित्वात् ङीष्।) वृक्षविशेषः। तत्पर्य्यायः। कन्थरी २ कन्था ३ दुर्द्धर्षा ४ तीक्ष्णकण्टका ५ तीक्ष्णगन्धा ६ क्रूरगन्धा ७ दुष्प्रवेशा ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफवातशोथरक्तग्रन्थिज्वरनाशित्वम्। दीपनत्वम्। रुचिकारित्वञ्च। इति राजनिर्घण्टः॥

कन्दं, क्ली पुं, (कन्दयति जिह्वायाः वैकल्यं जनयति रोदयति वा भक्षयन्तं जनम्। कदि+णिच्+अच्। यद्वा कन्द्यते कन्द इति नाम्ना आयते। कदि+कर्म्मणि+घञ्।) सूरणः। शस्यमूलम्। इति मेदिनी॥ गृञ्जनम्। इति राजनिर्घण्टः॥ (यथा, महाभारते १३।१४।११६॥

"वने निवसतां नित्यं कन्दमूलफलाशिनाम्"॥

यथा च, शान्तिशतके।२।२०।

"शीतं निर्झरवारिपानमशनं कन्दः सहाया मृगाः"॥

सूरणशब्देऽस्य विशेषो ज्ञेयः॥)

कन्दः, पुं, (कं जलं ददातीति। क+दा+कः। कन्दति कन्दयति कन्द्यते वा। कदि आह्वाने रोदने च। अच् घञ् वा।) मेघः। इति मेदिनी॥ योनिरोगविशेषः। तस्य निदानलक्षणे। यथा,—

"दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात्।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा॥
पूयशोणितसङ्काशं लकुचाकृतिसन्निभम्।
उत्पद्यते यदा योनौ नाम्ना कन्दस्तु योनिजः"॥

स चतुर्विधः। वातिकः १ पैत्तिकः २ श्लैष्मिकः ३ सान्निपातिकश्च ४। एषां यथाक्रमं लक्षणानि।

"रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत्।
दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तम्॥
नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्।
सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः।
सन्निपातात्मकोऽसाध्यः शेषाः कृच्छ्रप्रसाधनाः"।

इति माधवकरः॥ (अस्य चिकित्सामाह भावप्रकाशः॥

"गैरिकाम्रास्थि जन्तुघ्नं रजन्यञ्जनकट्फलाः।
पूरयेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः॥
त्रिफलायाः कषायेण सक्षौद्रेण च सेवयेत्।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते"॥

अन्यत्सर्व्वं योनिशब्दे द्रष्टव्यम्॥)

कन्दगुडूची, स्त्री, (कन्दोद्भवा गुडूची। शाकपार्थिवादिवत् समासः। मध्यपदलोपश्च।) गुडूचीविशेषः। तत्पर्य्यायः। कन्दोद्भवा २ कन्दामृता ३ बहुच्छिन्ना ४ बहुरुहा ५ पिण्डालुः ६ कन्दरोहिणी ७। इति राजनिर्घण्टः॥

कन्दटं, क्ली, (कदि+अटन्।) श्वेतोत्पलम्। इति शब्दरत्नावली। सादा सुँदि इति भाषा॥

कन्दफला, स्त्री, (कन्दात् कन्दमारभ्य वा फलं यस्याः।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कन्दबहुला, स्त्री, (कन्दादारभ्य कन्देन कन्देषु बहुला वा।) त्रिपर्णिका। इति राजनिर्घण्टः॥

कन्दमूलं, क्ली, (कन्द एव कन्दरूपं वा मूलं यस्य।) मूलकम्। इति राजनिर्घण्टः॥ (मूलकशब्देऽस्य गुणा वक्तव्याः॥)

कन्दरं, क्ली, (केन जलेन दीर्य्यते। दृ+विदारे+कर्म्मणि अप्। कं जलं श्लेष्मजनितं दृणाति नाशयतीति वा। दृ+अच्।) आर्द्रकम्। इति राजनिर्घण्टः॥ (आर्द्रकशब्देऽस्य गुणादयो ज्ञेयाः॥)

कन्दरः, पुं स्त्री, (केन जलेन दीर्य्यते विदीर्य्यतेऽसौ। दृ+कर्म्मणि अप्।) गुहा। इति मेदिनी॥ "निह्रादीचेन्मुरज इव ते कन्दरेषु ध्वनिः स्यात्"। इति मेघदूते ५८॥) कृत्रिमोऽकृत्रिमो वा सजलो निर्जलो वा महाकारो गिरिनितम्बदेशः। इति भरतः॥ तत्पर्य्यायः। दरी २ कन्दरा ३ इत्यमरः। २।३।६॥ कन्दरी ४। इति पञ्जिका॥ दरः ५। इति स्वामी॥ (यथा, भागवते।४।६।११।

"नानाऽमलप्रस्रवणैर्नानाकन्दरसानुभिः"॥)

कन्दरः, पुं, (कं मातङ्गशिरो दीर्य्यतेऽनेन। दृ+करणे अप्।) अङ्कुशः। इति मेदिनी॥

कन्दरा, स्त्री, (कन्दर+टाप्।) गुहा। इत्यमरः। २।३।६॥)

कन्दराकरः, पुं, (कन्दरस्य आकरः।) पर्व्वतः। इति हारावली॥

कन्दरालः, पुं, (कन्दराय अङ्कुराय अलतीति। कन्दर+अल+अच्॥) गर्द्दभाण्डवृक्षः। प्लक्षवृक्षः। इति मेदिनी॥ आखोटवृक्षः। इति राजनिर्घण्टः॥

कन्दरालकः, पुं, (कन्दराल एव स्वार्थे कन्।) प्लक्षवृक्षः। इति शब्दरत्नावली॥ (प्लक्षशब्दे विशेषोऽस्य ज्ञातव्यः॥)

कन्दरी, स्त्री, गुहा। इत्यमरः। २।३।६॥

कन्दरोद्भवा, स्त्री, (कन्दरे उद्भवतीति। कन्दर+उद्+भू+अच्+टाप्।) क्षुद्रपाषाणभेदीवृक्षः। इति राजनिर्घण्टः॥

कन्दर्पः, पुं, (कमित्यव्ययं कुत्सायां, कं कुत्सितो दर्पः यस्मात्। यद्वा कं सुखं तेन तत्र वा दृप्यति। दृप्+अच्। कं ब्रह्माणं प्रति दर्पितवान् वा।) कामदेवः। इत्यमरः।१।१।२६॥ (यथा, महाभारते १।२१५।१८।

"सांऽपश्यामभिषेकार्थमवतीर्णां समुद्रगाम्।
दृष्ट्वैव पुरुषव्याघ्र! कन्दर्पेणाभिमूर्च्छिता"॥)

ध्रुवकभेदः। यथा,—सङ्गीतदामोदरः॥

"त्रयोविंशतिवर्णाङ्घ्रिर्ध्रुवः कन्दर्पसंज्ञकः।
वीरे वा करुणे वा स्यात् खण्डताले विधीयते"॥

कन्दर्पकूपः, पुं, (कन्दर्पस्य कूप इव।) योनिः। इति जटाधरः॥

कन्दर्पजीवः, पुं, (कन्दर्पं जीवयति परिवर्द्धयतीति। कन्दर्प+जीव+अच्।) कामवृद्धिनामवृक्षः। इति राजनिर्घण्टः॥

कन्दर्पमुषलः पुं, (कन्दर्पस्य मुषल इव।) लिङ्गः। इति त्रिकाण्डशेषः॥

कन्दर्पशृङ्खलः, पुं, (कन्दर्पः शृङ्खलः यत्र। यद्वा कन्दर्पाय शृङ्खलः।) शृङ्गारबन्धविशेषः। तस्य लक्षणम्। यथा रतिमञ्जरी।

"नारी पदद्वयं स्थाप्य कान्तस्योरुद्वयोपरि।
कटिं चेद्दोलयेदाशु बन्धः कन्दर्पशृङ्खलः"॥

कन्दलं, त्रि, (कदि+अलच्।) कपालः। उपरागः। नवाङ्कुरः। कलध्वनिः। इति मेदिनी॥ अपवादः। इति शब्दरत्नावली॥ (कदलीविशेषः। यथा, अमरुशतके ४८। "प्रारम्भे निपतन्ति कन्दलदलोल्लासाः पयोबिन्दवः"॥)

कन्दलः, पुं, (कदि+अलच्।) कनकम्। युद्धम्। कपालः। इति धरणी॥

कन्दलता, स्त्री, (कन्दप्रधाना लता।) मालाकन्दः। इति राजनिर्घण्टः॥

कन्दली, स्त्री, (कन्दल+गौरादित्वात् ङीष्।) मृगविशेषः। यस्य चर्म्म व्यवह्रियते। गुल्मप्रभेदः। (यथा, मेघदूते २१।

"आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्"॥)

कदली। इति मेदिनी॥ (यथा, विक्रमोर्व्वश्यां। ७८।

"आरक्तराजिभिरियं कुसुमैर्नवकन्दलीसलिलगर्भैः"। इति॥)

पताका। इति त्रिकाण्डशेषः॥ पद्मबीजम्। इति राजनिर्घण्टः॥

कन्दलीकुसुमं, क्ली, (कन्दल्या इव कुसुममस्य।) शिलीन्ध्रम्। इति जटाधरः॥

कन्दवर्द्धनः, पुं, (कन्देन वर्द्धते इति। वृध्+ल्युः।) सूरणः। इति राजनिर्घण्टः॥ (सूरणशब्देऽस्य गुणादयो द्रष्टव्याः॥)

कन्दवल्ली, स्त्री, (कन्दाकारा+वल्ली।) वन्ध्याकर्कोटकी। इति राजनिर्घण्टः॥

कन्दशूरणः, पुं, (कन्देषु सूरणः श्रेष्ठः।) ओलः। इति राजनिर्घण्टः॥ (ओलशब्देऽस्य गुणादयो व्याख्याताः॥)

कन्दसंज्ञं, क्ली, (कन्द इति संज्ञा यस्य कन्दनाम्ना संज्ञायते वा।) योनिरक्तरोगविशेषः। तत्पर्य्यायः। योन्यर्शः २। इति त्रिकाण्डशेषः॥ तस्य निदानादि कन्दशब्दे द्रष्टव्यम्॥

कन्दसारं, क्ली, (कन्दानां सारो यत्र।) नन्दनवनम्। इति त्रिकाण्डशेषः॥ [राजनिर्घण्टः॥

कन्दाढ्यः, पुं, (कन्देन आढ्यः।) धरणीकन्दः। इति